Soundarya Lahari

सौन्दर्यलहरी

SHLOKA · श्लोक

1

शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं
न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि।
अतस्त्वामाराध्यां हरिहरविरिञ्चादिभिरपि
प्रणन्तुं स्तोतुं वा कथमकृतपुण्यः प्रभवति॥

Shivah shaktya yukto yadi bhavati shaktah prabhavitum
Na ched evam devo na khalu kushalah spanditum api.
Atas tvam aradhyam Hari Hara Virinchadibhir api
Pranantum stotum va katham akrita punyah prabhavati.

2

तनीयांसं पांसुं तव चरणपङ्केरुहभवं
विरिञ्चिः संचिन्वन्विरचयति लोकानविकलम्।
वहत्येनं शौरिः कथमपि सहस्रेण शिरसां
हरः संक्षुद्यैनं भजति भसितोद्धूलनविधिम्॥

Taniyansam pansum tava charana pankeruha bhavam
Virinchih sanchinvan virachayati lokan avikalam.
Vahaty enam Shaurih katham api sahasrena shirasam
Harah sankshudyainam bhajati bhasitoddhulana vidhim.

3

अविद्यानामन्तस्तिमिरमिहिरद्वीपनगरी
जडानां चैतन्यस्तबकमकरन्दस्रुतिझरी।
दरिद्राणां चिन्तामणिगुणनिका जन्मजलधौ
निमग्नानां दंष्ट्रा मुररिपुवराहस्य भवति॥

Avidyanam antas timira mihira dvipa nagari
Jadanam chaitanya stabaka makaranda sruti jhari.
Daridranam chintamani gunanika janma jaladhau
Nimagnanam danshtra Muraripu varahasya bhavati.

4

त्वदन्यः पाणिभ्यामभयवरदो दैवतगणा-
स्त्वमेका नैवासि प्रकटितवराभीत्यभिनया।
भयात्त्रातुं दातुं फलमपि च वाञ्छासमधिकं
शरण्ये लोकानां तव हि चरणावेव निपुणौ॥

Tvad anyah panibhyam abhaya varado daivata gana-
Stvam eka naivasi prakatita varabhity abhinaya.
Bhayat tratum datum phalam api cha vanchha samadhikam
Sharanye lokanam tava hi charanav eva nipunau.

5 हरिस्त्वामाराध्य प्रणतजनसौभाग्यजननीं
पुरा नारी भूत्वा पुररिपुमपि क्षोभमनयत्।
स्मरोऽपि त्वां नत्वा रतिनयनलेह्येन वपुषा
मुनीनामप्यन्तः प्रभवति हि मोहाय महताम्॥

Haris tvam aradhya pranata jana saubhagya jananim
Pura nari bhutva Puraripum api kshobham anayat.
Smaropi tvam natva rati nayana lehyena vapusha
Muninam apy antah prabhavati hi mohaya mahatam.

6 धनुः पौष्पं मौर्वी मधुकरमयी पञ्च विशिखा
वसन्तः सामन्तो मलयमरुदायोधनरथः।
तथाप्येकः सर्वं हिमगिरिसुते कामपि कृपा-
मपाङ्गात्ते लब्ध्वा जगदिदमनङ्गो विजयते॥

Dhanuh paushpam maurvi madhukaramayi pancha vishikha
Vasantah samanto malaya marud ayodhana rathah.
Tathapy ekah sarvam himagiri sute kam api kripa-
Mapangat te labdhva jagad idam anango vijayate.

7 क्वणत्काञ्चीदामा करिकलभकुम्भस्तननता
परिक्षीणा मध्ये परिणतशरच्चन्द्रवदना।
धनुर्बाणान्पाशं सृणिमपि दधाना करतलैः
पुरस्तादास्तां नः पुरमथितुराहोपुरुषिका॥

Kvanat kanchi dama kari kalabha kumbha stana nata
Parikshina madhye parinata sharach chandra vadana.
Dhanur banan pasham srinim api dadhana karatalaih
Purastad astam nah Puramathitur aho purushika.

8 सुधासिन्धोर्मध्ये सुरविटपिवाटीपरिवृते
मणिद्वीपे नीपोपवनवति चिन्तामणिगृहे।
शिवाकारे मञ्चे परमशिवपर्यङ्कनिलयां
भजन्ति त्वां धन्याः कतिचन चिदानन्दलहरीम्॥

Sudha sindhor madhye sura vitapi vati parivrite
Mani dvipe nipopavanavati chintamani grihe.
Shivakare manche Paramashiva paryanka nilayam
Bhajanti tvam dhanyah katichana chid ananda laharim.

9 महीं मूलाधारे कमपि मणिपूरे हुतवहं
स्थितं स्वाधिष्ठाने हृदि मरुतमाकाशमुपरि।
मनोऽपि भ्रूमध्ये सकलमपि भित्त्वा कुलपथं
सहस्रारे पद्मे सह रहसि पत्या विहरसे॥

Mahim muladhare kam api manipure hutavaham
Sthitam svadhishthane hridi marutam akasham upari.
Manopi bhrumadhye sakalam api bhittva kula patham
Sahasrare padme saha rahasi patya viharase.

10 सुधाधारासारैश्चरणयुगलान्तर्विगलितैः
प्रपञ्चं सिञ्चन्ती पुनरपि रसाम्नायमहसः।
अवाप्य स्वां भूमिं भुजगनिभमध्युष्टवलयं
स्वमात्मानं कृत्वा स्वपिषि कुलकुण्डे कुहरिणि॥

Sudha dhara saraish charana yugalantar vigalitaih
Prapancham sinchanti punar api rasamnaya mahasah.
Avapya svam bhumim bhujaga nibham adhyushta valayam
Svam atmanam kritva svapishi kula kunde kuharini.

11 चतुर्भिः श्रीकण्ठैः शिवयुवतिभिः पञ्चभिरपि
प्रभिन्नाभिः शंभोर्नवभिरपि मूलप्रकृतिभिः।
चतुश्चत्वारिंशद्वसुदलकलाश्रत्रिवलय-
त्रिरेखाभिः सार्धं तव शरणकोणाः परिणताः॥

Chaturbhih Shrikanthaih Shiva yuvatibhih panchabhir api
Prabhinnabhih Shambhor navabhir api mula prakritibhih.
Chatushchatvarinshad vasu dala kalashra trivalaya-
Trirekhabhih sardham tava sharana konah parinatah.

12 त्वदीयं सौन्दर्यं तुहिनगिरिकन्ये तुलयितुं
कवीन्द्राः कल्पन्ते कथमपि विरिञ्चिप्रभृतयः।
यदालोकौत्सुक्यादमरललना यान्ति मनसा
तपोभिर्दुष्प्रापामपि गिरिशसायुज्यपदवीम्॥

Tvadiyam saundaryam tuhina giri kanye tulayitum
Kavindrah kalpante katham api Virinchi prabhritayah.
Yad alokautsukyad amara lalana yanti manasa
Tapobhir dushprapam api Girisha sayujya padavim.

13 नरं वर्षीयांसं नयनविरसं नर्मसु जडं
तवापाङ्गालोके पतितमनुधावन्ति शतशः।
गलद्वेणीबन्धाः कुचकलशविस्रस्तसिचया
हठात्त्रुट्यत्काञ्च्यो विगलितदुकूला युवतयः॥

Naram varshiyansam nayana virasam narmasu jadam
Tavapangaloke patitam anudhavanti shatashah.
Galad veni bandhah kucha kalasha visrasta sichaya
Hathat trutyat kanchyo vigalita dukula yuvatayah.

14 क्षितौ षट्पञ्चाशद्द्विसमधिकपञ्चाशदुदके
हुताशे द्वाषष्टिश्चतुरधिकपञ्चाशदनिले।
दिवि द्विःषट्त्रिंशन्मनसि च चतुःषष्टिरिति ये
मयूखास्तेषामप्युपरि तव पादाम्बुजयुगम्॥

Kshitau shat panchashad dvi samadhika panchashad udake
Hutashe dvashashtish chaturadhika panchashad anile.
Divi dvih shattrinshan manasi cha chatuhshashtir iti ye
Mayukhas tesham apy upari tava padambuja yugam.

15 शरज्ज्योत्स्नाशुद्धां शशियुतजटाजूटमकुटां
वरत्रासत्राणस्फटिकघटिकापुस्तककराम्।
सकृन्न त्वा नत्वा कथमिव सतां संनिदधते
मधुक्षीरद्राक्षामधुरिमधुरीणाः फणितयः॥

Sharaj jyotsna shuddham shashi yuta jata juta makutam
Vara trasa trana sphatika ghatika pustaka karam.
Sakrin na tva natva katham iva satam sannidadhate
Madhu kshira draksha madhurima dhurinah phanitayah.

16 कवीन्द्राणां चेतःकमलवनबालातपरुचिं
भजन्ते ये सन्तः कतिचिदरुणामेव भवतीम्।
विरिञ्चिप्रेयस्यास्तरुणतरशृङ्गारलहरी-
गभीराभिर्वाग्भिर्विदधति सतां रञ्जनममी॥

Kavindranam chetah kamala vana balatapa ruchim
Bhajante ye santah katichid arunam eva bhavatim.
Virinchi preyasyas tarunatara shringara lahari-
Gabhirabhir vagbhir vidadhati satam ranjanam ami.

17 सवित्रीभिर्वाचां शशिमणिशिलाभङ्गरुचिभि-
र्वशिन्याद्याभिस्त्वां सह जननि संचिन्तयति यः।
स कर्ता काव्यानां भवति महतां भङ्गिरुचिभि-
र्वचोभिर्वाग्देवीवदनकमलामोदमधुरैः॥

Savitribhir vacham shashi mani shila bhanga ruchibhi-
Rvashinyadyabhis tvam saha janani sanchintayati yah.
Sa karta kavyanam bhavati mahatam bhangi ruchibhi-
Rvachobhir vagdevi vadana kamalamoda madhuraih.

18 तनुच्छायाभिस्ते तरुणतरणिश्रीसरणिभि-
र्दिवं सर्वामुर्वीमरुणिमनि मग्नां स्मरति यः।
भवन्त्यस्य त्रस्यद्वनहरिणशालीननयनाः
सहोर्वश्या वश्याः कति कति न गीर्वाणगणिकाः॥

Tanu chchhayabhis te taruna tarani shri saranibhi-
Rdivam sarvam urvim arunimani magnam smarati yah.
Bhavanty asya trasyad vana harina shalina nayanah
Sahorvashya vashyah kati kati na girvana ganikah.

19 मुखं बिन्दुं कृत्वा कुचयुगमधस्तस्य तदधो
हरार्धं ध्यायेद्यो हरमहिषि ते मन्मथकलाम्।
स सद्यः संक्षोभं नयति वनिता इत्यतिलघु
त्रिलोकीमप्याशु भ्रमयति रवीन्दुस्तनयुगाम्॥

Mukham bindum kritva kucha yugam adhas tasya tad adho
Harardham dhyayed yo Hara mahishi te manmatha kalam.
Sa sadyah sankshobham nayati vanita ity atilaghu
Trilokim apy ashu bhramayati ravindu stana yugam.

20 किरन्तीमङ्गेभ्यः किरणनिकुरुम्बामृतरसं
हृदि त्वामाधत्ते हिमकरशिलामूर्तिमिव यः।
स सर्पाणां दर्पं शमयति शकुन्ताधिप इव
ज्वरप्लुष्टान्दृष्ट्या सुखयति सुधाधारसिरया॥

Kirantim angebhyah kirana nikurumbamrita rasam
Hridi tvam adhatte himakara shila murtim iva yah.
Sa sarpanam darpam shamayati shakuntadhipa iva
Jvara plushtan drishtya sukhayati sudhadhara siraya.

21 तटिल्लेखातन्वीं तपनशशिवैश्वानरमयीं
निषण्णां षण्णामप्युपरि कमलानां तव कलाम्।
महापद्माटव्यां मृदितमलमायेन मनसा
महान्तः पश्यन्तो दधति परमाह्लादलहरीम्॥

Tatil lekha tanvim tapana shashi vaishvanaramayim
Nishannam shannam apy upari kamalanam tava kalam.
Maha padmatavyam mridita mala mayena manasa
Mahantah pashyanto dadhati paramahlada laharim.

22 भवानि त्वं दासे मयि वितर दृष्टिं सकरुणा-
मिति स्तोतुं वाञ्छन्कथयति भवानि त्वमिति यः।
तदैव त्वं तस्मै दिशसि निजसायुज्यपदवीं
मुकुन्दब्रह्मेन्द्रस्फुटमकुटनीराजितपदाम्॥

Bhavani tvam dase mayi vitara drishtim sakaruna-
Miti stotum vanchhan kathayati Bhavani tvam iti yah.
Tadaiva tvam tasmai dishasi nija sayujya padavim
Mukunda Brahmendra sphuta makuta nirajita padam.

23 त्वया हृत्वा वामं वपुरपरितृप्तेन मनसा
शरीरार्धं शंभोरपरमपि शङ्के हृतमभूत्।
यदेतत्त्वद्रूपं सकलमरुणाभं त्रिनयनं
कुचाभ्यामानम्रं कुटिलशशिचूडालमकुटम्॥

Tvaya hritva vamam vapur aparitriptena manasa
Sharirardham Shambhor aparam api shanke hritam abhut.
Yad etat tvad rupam sakalam arunabham trinayanam
Kuchabhyam anamram kutila shashi chudala makutam.

24 जगत्सूते धाता हरिरवति रुद्रः क्षपयते
तिरस्कुर्वन्नेतत्स्वमपि वपुरीशस्तिरयति।
सदापूर्वः सर्वं तदिदमनुगृह्णाति च शिव-
स्तवाज्ञामालम्ब्य क्षणचलितयोर्भ्रूलतिकयोः॥

Jagat sute Dhata Harir avati Rudrah kshapayate
Tiraskurvann etat svam api vapur Ishas tirayati.
Sadapurvah sarvam tad idam anugrihnati cha Shiva-
Stavajnam alambya kshana chalitayor bhru latikayoh.

25 त्रयाणां देवानां त्रिगुणजनितानां तव शिवे
भवेत्पूजा पूजा तव चरणयोर्या विरचिता।
तथा हि त्वत्पादोद्वहनमणिपीठस्य निकटे
स्थिता ह्येते शश्वन्मुकुलितकरोत्तंसमुकुटाः॥

Trayanam devanam triguna janitanam tava Shive
Bhavet puja puja tava charanayor ya virachita.
Tatha hi tvat padodvahana mani pithasya nikate
Sthita hy ete shashvan mukulita karottansa mukutah.

26 विरिञ्चिः पञ्चत्वं व्रजति हरिराप्नोति विरतिं
विनाशं कीनाशो भजति धनदो याति निधनम्।
वितन्द्री माहेन्द्री विततिरपि संमीलितदृशा
महासंहारेऽस्मिन्विहरति सति त्वत्पतिरसौ॥

Virinchih panchatvam vrajati Harir apnoti viratim
Vinasham kinasho bhajati dhanado yati nidhanam.
Vitandri mahendri vitatir api sammilita drisha
Maha sanharesmin viharati sati tvat patir asau.

27 जपो जल्पः शिल्पं सकलमपि मुद्राविरचना
गतिः प्रादक्षिण्यक्रमणमशनाद्याहुतिविधिः।
प्रणामः संवेशः सुखमखिलमात्मार्पणदृशा
सपर्यापर्यायस्तव भवतु यन्मे विलसितम्॥

Japo jalpah shilpam sakalam api mudra virachana
Gatih pradakshinya kramanam ashanady ahuti vidhih.
Pranamah sanveshah sukham akhilam atmarpana drisha
Saparya paryayas tava bhavatu yan me vilasitam.

28 सुधामप्यास्वाद्य प्रतिभयजरामृत्युहरिणीं
विपद्यन्ते विश्वे विधिशतमखाद्या दिविषदः।
करालं यत्क्ष्वेलं कवलितवतः कालकलना
न शंभोस्तन्मूलं तव जननि ताटङ्कमहिमा॥

Sudham apy asvadya pratibhaya jara mrityu harinim
Vipadyante vishve vidhi shatamakhadya divishadah.
Karalam yat kshvelam kavalitavatah kala kalana
Na Shambhos tan mulam tava janani tatanka mahima.

29 किरीटं वैरिञ्चं परिहर पुरः कैटभभिदः
कठोरे कोटीरे स्खलसि जहि जम्भारिमकुटम्।
प्रणम्रेष्वेतेषु प्रसभमुपयातस्य भवनं
भवस्याभ्युत्थाने तव परिजनोक्तिर्विजयते॥

Kiritam vairincham parihara purah Kaitabhabhidah
Kathore kotire skhalasi jahi jambhari makutam.
Pranamreshv eteshu prasabham upayatasya bhavanam
Bhavasyabhyutthane tava parijanoktir vijayate.

30 स्वदेहोद्भूताभिर्घृणिभिरणिमाद्याभिरभितो
निषेव्ये नित्ये त्वामहमिति सदा भावयति यः।
किमाश्चर्यं तस्य त्रिनयनसमृद्धिं तृणयतो
महासंवर्ताग्निर्विरचयति नीराजनविधिम्॥

Sva dehodbhutabhir ghrinibhir animadyabhir abhito
Nishevye nitye tvam aham iti sada bhavayati yah.
Kim ashcharyam tasya trinayana samriddhim trinayato
Maha sanvartagnir virachayati nirajana vidhim.

31 चतुःषष्ट्या तन्त्रैः सकलमतिसंधाय भुवनं
स्थितस्तत्तत्सिद्धिप्रसवपरतन्त्रैः पशुपतिः।
पुनस्त्वन्निर्बन्धादखिलपुरुषार्थैकघटना-
स्वतन्त्रं ते तन्त्रं क्षितितलमवातीतरदिदम्॥

Chatuhshashtya tantraih sakalam atisandhaya bhuvanam
Sthitas tat tat siddhi prasava paratantraih Pashupatih.
Punas tvan nirbandhad akhila purusharthaika ghatana-
Svatantram te tantram kshiti talam avatitarad idam.

32 शिवः शक्तिः कामः क्षितिरथ रविः शीतकिरणः
स्मरो हंसः शक्रस्तदनु च परामारहरयः।
अमी हृल्लेखाभिस्तिसृभिरवसानेषु घटिता
भजन्ते वर्णास्ते तव जननि नामावयवताम्॥

Shivah shaktih kamah kshitir atha ravih shita kiranah
Smaro hansah shakras tad anu cha para mara harayah.
Ami hrillekhabhis tisribhir avasaneshu ghatita
Bhajante varnas te tava janani namavayavatam.

33 स्मरं योनिं लक्ष्मीं त्रितयमिदमादौ तव मनो-
र्निधायैके नित्ये निरवधिमहाभोगरसिकाः।
भजन्ति त्वां चिन्तामणिगुणनिबद्धाक्षवलयाः
शिवाग्नौ जुह्वन्तः सुरभिघृतधाराहुतिशतैः॥

Smaram yonim lakshmim tritayam idam adau tava mano-
Rnidhayaike nitye niravadhi maha bhoga rasikah.
Bhajanti tvam chintamani guna nibaddhaksha valayah
Shivagnau juhvantah surabhi ghrita dharahuti shataih.

34 शरीरं त्वं शंभोः शशिमिहिरवक्षोरुहयुगं
तवात्मानं मन्ये भगवति नवात्मानमनघम्।
अतः शेषः शेषीत्ययमुभयसाधारणतया
स्थितः संबन्धो वां समरसपरानन्दपरयोः॥

Shariram tvam Shambhoh shashi mihira vakshoruha yugam
Tavatmanam manye bhagavati navatmanam anagham.
Atah sheshah sheshity ayam ubhaya sadharanataya
Sthitah sambandho vam samarasa paranandaparayoh.

35 मनस्त्वं व्योम त्वं मरुदसि मरुत्सारथिरसि
त्वमापस्त्वं भूमिस्त्वयि परिणतायां न हि परम्।
त्वमेव स्वात्मानं परिणमयितुं विश्ववपुषा
चिदानन्दाकारं शिवयुवति भावेन बिभृषे॥

Manas tvam vyoma tvam marud asi marut sarathir asi
Tvam apas tvam bhumis tvayi parinatayam na hi param.
Tvam eva svatmanam parinamayitum vishva vapusha
Chid anandakaram Shiva yuvati bhavena bibhrishe.

36 तवाज्ञाचक्रस्थं तपनशशिकोटिद्युतिधरं
परं शंभुं वन्दे परिमिलितपार्श्वं परचिता।
यमाराध्यन्भक्त्या रविशशिशुचीनामविषये
निरालोकेऽलोके निवसति हि भालोकभुवने॥

Tavajna chakrastham tapana shashi koti dyuti dharam
Param Shambhum vande parimilita parshvam parachita.
Yam aradhyan bhaktya ravi shashi shuchinam avishaye
Niraloke loke nivasati hi bhaloka bhuvane.

37 विशुद्धौ ते शुद्धस्फटिकविशदं व्योमजनकं
शिवं सेवे देवीमपि शिवसमानव्यवसिताम्।
ययोः कान्त्या यान्त्याः शशिकिरणसारूप्यसरणे-
र्विधूतान्तर्ध्वान्ता विलसति चकोरीव जगती॥

Vishuddhau te shuddha sphatika vishadam vyoma janakam
Shivam seve devim api Shiva samana vyavasitam.
Yayoh kantya yantyah shashi kirana sarupya sarane-
Rvidhutantar dhvanta vilasati chakoriva jagati.

38 समुन्मीलत्संवित्कमलमकरन्दैकरसिकं
भजे हंसद्वन्द्वं किमपि महतां मानसचरम्।
यदालापादष्टादशगुणितविद्यापरिणति-
र्यदादत्ते दोषाद्गुणमखिलमद्भ्यः पय इव॥

Samunmilat sanvit kamala makarandaika rasikam
Bhaje hansa dvandvam kim api mahatam manasa charam.
Yad alapad ashtadasha gunita vidya parinati-
Ryad adatte doshad gunam akhilam adbhyah paya iva.

39 तव स्वाधिष्ठाने हुतवहमधिष्ठाय निरतं
तमीडे संवर्तं जननि महतीं तां च समयाम्।
यदालोके लोकान्दहति महति क्रोधकलिते
दयार्द्रा या दृष्टिः शिशिरमुपचारं रचयति॥

Tava svadhishthane hutavaham adhishthaya niratam
Tam ide sanvartam janani mahatim tam cha samayam.
Yad aloke lokan dahati mahati krodha kalite
Dayardra ya drishtih shishiram upacharam rachayati.

40 तटित्वन्तं शक्त्या तिमिरपरिपन्थिस्फुरणया
स्फुरन्नानारत्नाभरणपरिणद्धेन्द्रधनुषम्।
तव श्यामं मेघं कमपि मणिपूरैकशरणं
निषेवे वर्षन्तं हरमिहिरतप्तं त्रिभुवनम्॥

Tatitvantam shaktya timira paripanthi sphuranaya
Sphuran nana ratnabharana parinaddhendra dhanusham.
Tava shyamam megham kam api manipuraika sharanam
Nisheve varshantam Hara mihira taptam tribhuvanam.

41 तवाधारे मूले सह समयया लास्यपरया
नवात्मानं मन्ये नवरसमहाताण्डवनटम्।
उभाभ्यामेताभ्यामुदयविधिमुद्दिश्य दयया
सनाथाभ्यां जज्ञे जनकजननीमज्जगदिदम्॥

Tavadhare mule saha samayaya lasya paraya
Navatmanam manye nava rasa maha tandava natam.
Ubhabhyam etabhyam udaya vidhim uddishya dayaya
Sanathabhyam jajne janaka jananimaj jagad idam.

42 गतैर्माणिक्यत्वं गगनमणिभिः सान्द्रघटितं
किरीटं ते हैमं हिमगिरिसुते कीर्तयति यः।
स नीडेयच्छायाच्छुरणशबलं चन्द्रशकलं
धनुः शौनासीरं किमिति न निबध्नाति धिषणाम्॥

Gatair manikyatvam gagana manibhih sandra ghatitam
Kiritam te haimam himagiri sute kirtayati yah.
Sa nideyach chhaya chchhurana shabalam chandra shakalam
Dhanuh shaunasiram kim iti na nibadhnati dhishanam.

43 धुनोतु ध्वान्तं नस्तुलितदलितेन्दीवरवनं
घनस्निग्धश्लक्ष्णं चिकुरनिकुरुम्बं तव शिवे।
यदीयं सौरभ्यं सहजमुपलब्धुं सुमनसो
वसन्त्यस्मिन्मन्ये बलमथनवाटीविटपिनाम्॥

Dhunotu dhvantam nas tulita dalitendivara vanam
Ghana snigdha shlakshnam chikura nikurumbam tava Shive.
Yadiyam saurabhyam sahajam upalabdhum sumanaso
Vasanty asmin manye balamathana vati vitapinam.

44 तनोतु क्षेमं नस्तव वदनसौन्दर्यलहरी-
परीवाहः स्रोतःसरणिरिव सीमन्तसरणिः।
वहन्ती सिन्दूरं प्रबलकबरीभारतिमिर-
द्विषां बृन्दैर्बन्दीकृतमिव नवीनार्ककिरणम्॥

Tanotu kshemam nas tava vadana saundarya lahari-
Parivahah srotah saranir iva simanta saranih.
Vahanti sinduram prabala kabari bhara timira-
Dvisham brindair bandikritam iva navinarka kiranam.

45 अरालैः स्वाभाव्यादलिकलभसश्रीभिरलकैः
परीतं ते वक्त्रं परिहसति पङ्केरुहरुचिम्।
दरस्मेरे यस्मिन्दशनरुचिकिञ्जल्करुचिरे
सुगन्धौ माद्यन्ति स्मरदहनचक्षुर्मधुलिहः॥

Aralaih svabhavyad alikalabha sashribhir alakaih
Paritam te vaktram parihasati pankeruha ruchim.
Dara smere yasmin dashana ruchi kinjalka ruchire
Sugandhau madyanti smaradahana chakshur madhulihah.

46 ललाटं लावण्यद्युतिविमलमाभाति तव य-
द्द्वितीयं तन्मन्ये मकुटघटितं चन्द्रशकलम्।
विपर्यासन्यासादुभयमपि संभूय च मिथः
सुधालेपस्यूतिः परिणमति राकाहिमकरः॥

Lalatam lavanya dyuti vimalam abhati tava ya-
Ddvitiyam tan manye makuta ghatitam chandra shakalam.
Viparyasa nyasad ubhayam api sambhuya cha mithah
Sudhalepa syutih parinamati raka himakarah.

47 भ्रुवौ भुग्ने किंचिद्भुवनभयभङ्गव्यसनिनि
त्वदीये नेत्राभ्यां मधुकररुचिभ्यां धृतगुणम्।
धनुर्मन्ये सव्येतरकरगृहीतं रतिपतेः
प्रकोष्ठे मुष्टौ च स्थगयति निगूढान्तरमुमे॥

Bhruvau bhugne kinchid bhuvana bhaya bhanga vyasanini
Tvadiye netrabhyam madhukara ruchibhyam dhrita gunam.
Dhanur manye savyetara kara grihitam ratipateh
Prakoshthe mushtau cha sthagayati nigudhantaram ume.

48 अहः सूते सव्यं तव नयनमर्कात्मकतया
त्रियामां वामं ते सृजति रजनीनायकतया।
तृतीया ते दृष्टिर्दरदलितहेमाम्बुजरुचिः
समाधत्ते संध्यां दिवसनिशयोरन्तरचरीम्॥

Ahah sute savyam tava nayanam arkatmakataya
Triyamam vamam te srijati rajani nayakataya.
Tritiya te drishtir dara dalita hemambuja ruchih
Samadhatte sandhyam divasa nishayor antara charim.

49 विशाला कल्याणी स्फुटरुचिरयोध्या कुवलयैः
कृपाधाराधारा किमपि मधुराभोगवतिका।
अवन्ती दृष्टिस्ते बहुनगरविस्तारविजया
ध्रुवं तत्तन्नामव्यवहरणयोग्या विजयते॥

Vishala kalyani sphuta ruchir ayodhya kuvalayaih
Kripa dhara dhara kim api madhurabhogavatika.
Avanti drishtis te bahu nagara vistara vijaya
Dhruvam tat tan nama vyavaharana yogya vijayate.

50 कवीनां संदर्भस्तबकमकरन्दैकरसिकं
कटाक्षव्याक्षेपभ्रमरकलभौ कर्णयुगलम्।
अमुञ्चन्तौ दृष्ट्वा तव नवरसास्वादतरला-
वसूयासंसर्गादलिकनयनं किंचिदरुणम्॥

Kavinam sandarbha stabaka makarandaika rasikam
Kataksha vyakshepa bhramara kalabhau karna yugalam.
Amunchantau drishtva tava nava rasasvada tarala-
Vasuya sansargad alika nayanam kinchid arunam.

51 शिवे शृङ्गारार्द्रा तदितरजने कुत्सनपरा
सरोषा गङ्गायां गिरिशचरिते विस्मयवती।
हराहिभ्यो भीता सरसिरुहसौभाग्यजननी
सखीषु स्मेरा ते मयि जननि दृष्टिः सकरुणा॥

Shive shringarardra taditara jane kutsana para
Sarosha Gangayam Girisha charite vismayavati.
Harahibhyo bhita sarasiruha saubhagya janani
Sakhishu smera te mayi janani drishtih sakaruna.

52 गते कर्णाभ्यर्णं गरुत इव पक्ष्माणि दधती
पुरां भेत्तुश्चित्तप्रशमरसविद्रावणफले।
इमे नेत्रे गोत्राधरपतिकुलोत्तंसकलिके
तवाकर्णाकृष्टस्मरशरविलासं कलयतः॥

Gate karnabhyarnam garuta iva pakshmani dadhati
Puram bhettush chitta prashama rasa vidravana phale.
Ime netre gotradhara pati kulottansa kalike
Tavakarnakrishta smara shara vilasam kalayatah.

53 विभक्तत्रैवर्ण्यं व्यतिकरितलीलाञ्जनतया
विभाति त्वन्नेत्रत्रितयमिदमीशानदयिते।
पुनः स्रष्टुं देवान्द्रुहिणहरिरुद्रानुपरता-
न्रजः सत्त्वं बिभ्रत्तम इति गुणानां त्रयमिव॥

Vibhakta traivarnyam vyatikarita lilanjanataya
Vibhati tvan netra tritayam idam Ishana dayite.
Punah srashtum devan Druhina Hari Rudran uparata-
Nrajah sattvam bibhrat tama iti gunanam trayam iva.

54 पवित्रीकर्तुं नः पशुपतिपराधीनहृदये
दयामित्रैर्नेत्रैररुणधवलश्यामरुचिभिः।
नदः शोणो गङ्गा तपनतनयेति ध्रुवममुं
त्रयाणां तीर्थानामुपनयसि संभेदमनघम्॥

Pavitrikartum nah Pashupati paradhina hridaye
Daya mitrair netrair aruna dhavala shyama ruchibhih.
Nadah shono Ganga tapana tanayeti dhruvam amum
Trayanam tirthanam upanayasi sambhedam anagham.

55 निमेषोन्मेषाभ्यां प्रलयमुदयं याति जगती
तवेत्याहुः सन्तो धरणिधरराजन्यतनये।
त्वदुन्मेषाज्जातं जगदिदमशेषं प्रलयतः
परित्रातुं शङ्के परिहृतनिमेषास्तव दृशः॥

Nimeshonmeshabhyam pralayam udayam yati jagati
Tavety ahuh santo dharanidhara rajanya tanaye.
Tvad unmeshaj jatam jagad idam ashesham pralayatah
Paritratum shanke parihrita nimeshas tava drishah.

56 तवापर्णे कर्णेजपनयनपैशुन्यचकिता
निलीयन्ते तोये नियतमनिमेषाः शफरिकाः।
इयं च श्रीर्बद्धच्छदपुटकवाटं कुवलयं
जहाति प्रत्यूषे निशि च विघटय्य प्रविशति॥

Tavaparne karnejapa nayana paishunya chakita
Niliyante toye niyatam animeshah shapharikah.
Iyam cha shrir baddhach chhada putaka vatam kuvalayam
Jahati pratyushe nishi cha vighatayya pravishati.

57 दृशा द्राघीयस्या दरदलितनीलोत्पलरुचा
दवीयांसं दीनं स्नपय कृपया मामपि शिवे।
अनेनायं धन्यो भवति न च ते हानिरियता
वने वा हर्म्ये वा समकरनिपातो हिमकरः॥

Drisha draghiyasya dara dalita nilotpala rucha
Daviyansam dinam snapaya kripaya mam api Shive.
Anenayam dhanyo bhavati na cha te hanir iyata
Vane va harmye va sama kara nipato himakarah.

58 अरालं ते पालीयुगलमगराजन्यतनये
न केषामाधत्ते कुसुमशरकोदण्डकुतुकम्।
तिरश्चीनो यत्र श्रवणपथमुल्लङ्घ्य विलस-
न्नपाङ्गव्यासङ्गो दिशति शरसंधानधिषणाम्॥

Aralam te pali yugalam agarajanya tanaye
Na kesham adhatte kusuma shara kodanda kutukam.
Tirashchino yatra shravana patham ullanghya vilasa-
Nnapanga vyasango dishati shara sandhana dhishanam.

59 स्फुरद्गण्डाभोगप्रतिफलिततटङ्कयुगलं
चतुश्चक्रं मन्ये तव मुखमिदं मन्मथरथम्।
यमारुह्य द्रुह्यत्यवनिरथमर्केन्दुचरणं
महावीरो मारः प्रमथपतये सज्जितवते॥

Sphurad ganda bhoga pratiphalita tatanka yugalam
Chatush chakram manye tava mukham idam manmatha ratham.
Yam aruhya druhyaty avani ratham arkendu charanam
Mahaviro marah pramatha pataye sajjitavate.

60 सरस्वत्याः सूक्तीरमृतलहरीकौशलहरीः
पिबन्त्याः शर्वाणि श्रवणचुलकाभ्यामविरलम्।
चमत्कारश्लाघाचलितशिरसः कुण्डलगणो
झणत्कारैस्तारैः प्रतिवचनमाचष्ट इव ते॥

Sarasvatyah suktir amrita lahari kaushala harih
Pibantyah Sharvani shravana chulakabhyam aviralam.
Chamatkara shlagha chalita shirasah kundala gano
Jhanatkarais taraih prativachanam achashta iva te.

61 असौ नासावंशस्तुहिनगिरिवंशध्वजपटि
त्वदीयो नेदीयः फलतु फलमस्माकमुचितम्।
वहत्यन्तर्मुक्ताः शिशिरकरनिश्वासगलितं
समृद्ध्या यत्तासां बहिरपि च मुक्तामणिधरः॥

Asau nasa vanshas tuhina giri vansha dhvaja pati
Tvadiyo nediyah phalatu phalam asmakam uchitam.
Vahaty antar muktah shishira kara nishvasa galitam
Samriddhya yat tasam bahir api cha mukta mani dharah.

62 प्रकृत्यारक्तायास्तव सुदति दन्तच्छदरुचेः
प्रवक्ष्ये सादृश्यं जनयतु फलं विद्रुमलता।
न बिम्बं तद्बिम्बप्रतिफलनरागादरुणितं
तुलामध्यारोढुं कथमिव विलज्जेत कलया॥

Prakrityaraktayas tava sudati dantachchhada rucheh
Pravakshye sadrishyam janayatu phalam vidruma lata.
Na bimbam tad bimba pratiphalana ragad arunitam
Tulam adhyarodhum katham iva vilajjeta kalaya.

63 स्मितज्योत्स्नाजालं तव वदनचन्द्रस्य पिबतां
चकोराणामासीदतिरसतया चञ्चुजडिमा।
अतस्ते शीतांशोरमृतलहरीमाम्लरुचयः
पिबन्ति स्वच्छन्दं निशिनिशि भृशं काञ्जिकधिया॥

Smita jyotsna jalam tava vadana chandrasya pibatam
Chakoranam asid atirasataya chanchu jadima.
Atas te shitanshor amrita laharim amla ruchayah
Pibanti svachchhandam nishi nishi bhrisham kanjika dhiya.

64 अविश्रान्तं पत्युर्गुणगणकथाम्रेडनजपा
जपापुष्पच्छाया तव जननि जिह्वा जयति सा।
यदग्रासीनायाः स्फटिकदृषदच्छच्छविमयी
सरस्वत्या मूर्तिः परिणमति माणिक्यवपुषा॥

Avishrantam patyur guna gana kathamredana japa
Japa pushpach chhaya tava janani jihva jayati sa.
Yad agrasinayah sphatika drishad achchha chchhavimayi
Sarasvatya murtih parinamati manikya vapusha.

65 रणे जित्वा दैत्यानपहृतशिरस्त्रैः कवचिभि-
र्निवृत्तैश्चण्डांशत्रिपुरहरनिर्माल्यविमुखैः।
विशाखेन्द्रोपेन्द्रैः शशिविशदकर्पूरशकला
विलीयन्ते मातस्तव वदनताम्बूलकबलाः॥

Rane jitva daityan apahrita shirastraih kavachibhi-
Rnivrittaish Chandansha Tripurahara nirmalya vimukhaih.
Vishakhendropendraih shashi vishada karpura shakala
Viliyante matas tava vadana tambula kabalah.

66 विपञ्च्या गायन्ती विविधमपदानं पशुपते-
स्त्वयारब्धे वक्तुं चलितशिरसा साधुवचने।
तदीयैर्माधुर्यैरपलपिततन्त्रीकलरवां
निजां वीणां वाणी निचुलयति चोलेन निभृतम्॥

Vipanchya gayanti vividham apadanam Pashupate-
Stvayarabdhe vaktum chalita shirasa sadhu vachane.
Tadiyair madhuryair apalapita tantri kala ravam
Nijam vinam Vani nichulayati cholena nibhritam.

67 कराग्रेण स्पृष्टं तुहिनगिरिणा वत्सलतया
गिरीशेनोदस्तं मुहुरधरपानाकुलतया।
करग्राह्यं शंभोर्मुखमुकुरवृन्तं गिरिसुते
कथंकारं ब्रूमस्तव चुबुकमौपम्यरहितम्॥

Karagrena sprishtam tuhina girina vatsalataya
Girishenodastam muhur adhara panakulataya.
Kara grahyam Shambhor mukha mukura vrintam giri sute
Kathankaram brumas tava chubukam aupamya rahitam.

68 भुजाश्लेषान्नित्यं पुरदमयितुः कण्टकवती
तव ग्रीवा धत्ते मुखकमलनालश्रियमियम्।
स्वतः श्वेता कालागुरुबहुलजम्बालमलिना
मृणालीलालित्यं वहति यदधो हारलतिका॥

Bhujashleshan nityam Puradamayituh kantakavati
Tava griva dhatte mukha kamala nala shriyam iyam.
Svatah shveta kalaguru bahula jambala malina
Mrinali lalityam vahati yad adho hara latika.

69 गले रेखास्तिस्रो गतिगमकगीतैकनिपुणे
विवाहव्यानद्धप्रगुणगुणसंख्याप्रतिभुवः।
विराजन्ते नानाविधमधुररागाकरभुवां
त्रयाणां ग्रामाणां स्थितिनियमसीमान इव ते॥

Gale rekhas tisro gati gamaka gitaika nipune
Vivaha vyanaddha praguna guna sankhya pratibhuvah.
Virajante nanavidha madhura ragakara bhuvam
Trayanam gramanam sthiti niyama simana iva te.

70 मृणालीमृद्वीनां तव भुजलतानां चतसृणां
चतुर्भिः सौन्दर्यं सरसिजभवः स्तौति वदनैः।
नखेभ्यः संत्रस्यन्प्रथममथनादन्धकरिपो-
श्चतुर्णां शीर्षाणां सममभयहस्तार्पणधिया॥

Mrinali mridvinam tava bhuja latanam chatasrinam
Chaturbhih saundaryam sarasija bhavah stauti vadanaih.
Nakhebhyah santrasyan prathama mathanad Andhakaripo-
Shchaturnam shirshanam samam abhaya hastarpana dhiya.

71 नखानामुद्योतैर्नवनलिनरागं विहसतां
कराणां ते कान्तिं कथय कथयामः कथमुमे।
कयाचिद्वा साम्यं भजतु कलया हन्त कमलं
यदि क्रीडल्लक्ष्मीचरणतललाक्षारसचणम्॥

Nakhanam udyotair nava nalina ragam vihasatam
Karanam te kantim kathaya kathayamah katham ume.
Kayachid va samyam bhajatu kalaya hanta kamalam
Yadi kridal lakshmi charana tala laksha rasa chanam.

72 समं देवि स्कन्दद्विपवदनपीतं स्तनयुगं
तवेदं नः खेदं हरतु सततं प्रस्नुतमुखम्।
यदालोक्याशङ्काकुलितहृदयो हासजनकः
स्वकुम्भौ हेरम्बः परिमृशति हस्तेन झटिति॥

Samam devi Skanda dvipa vadana pitam stana yugam
Tavedam nah khedam haratu satatam prasnuta mukham.
Yad alokyashankakulita hridayo hasa janakah
Sva kumbhau Herambah parimrishati hastena jhatiti.

73 अमू ते वक्षोजावमृतरसमाणिक्यकुतुपौ
न संदेहस्पन्दो नगपतिपताके मनसि नः।
पिबन्तौ तौ यस्मादविदितवधूसङ्गरसिकौ
कुमारावद्यापि द्विरदवदनक्रौञ्चदलनौ॥

Amu te vakshojav amrita rasa manikya kutupau
Na sandeha spando nagapati patake manasi nah.
Pibantau tau yasmad avidita vadhu sanga rasikau
Kumarav adyapi dvirada vadana krauncha dalanau.

74 वहत्यम्ब स्तम्बेरमदनुजकुम्भप्रकृतिभिः
समारब्धां मुक्तामणिभिरमलां हारलतिकाम्।
कुचाभोगो बिम्बाधररुचिभिरन्तः शबलितां
प्रतापव्यामिश्रां पुरदमयितुः कीर्तिमिव ते॥

Vahaty amba stamberama danuja kumbha prakritibhih
Samarabdham mukta manibhir amalam hara latikam.
Kuchabhogo bimbadhara ruchibhir antah shabalitam
Pratapa vyamishram Puradamayituh kirtim iva te.

75 तव स्तन्यं मन्ये धरणिधरकन्ये हृदयतः
पयःपारावारः परिवहति सारस्वतमिव।
दयावत्या दत्तं द्रविडशिशुरास्वाद्य तव य-
त्कवीनां प्रौढानामजनि कमनीयः कवयिता॥

Tava stanyam manye dharanidhara kanye hridayatah
Payah paravarah parivahati sarasvatam iva.
Dayavatya dattam Dravida shishur asvadya tava ya-
Tkavinam praudhanam ajani kamaniyah kavayita.

76 हरक्रोधज्वालावलिभिरवलीढेन वपुषा
गभीरे ते नाभीसरसि कृतसङ्गो मनसिजः।
समुत्तस्थौ तस्मादचलतनये धूमलतिका
जनस्तां जानीते तव जननि रोमावलिरिति॥

Hara krodha jvalavalibhir avalidhena vapusha
Gabhire te nabhi sarasi krita sango manasijah.
Samuttasthau tasmad achala tanaye dhuma latika
Janas tam janite tava janani romavalir iti.

77 यदेतत्कालिन्दीतनुतरतरङ्गाकृति शिवे
कृशे मध्ये किंचिज्जननि तव यद्भाति सुधियाम्।
विमर्दादन्योन्यं कुचकलशयोरन्तरगतं
तनूभूतं व्योम प्रविशदिव नाभिं कुहरिणीम्॥

Yad etat kalindi tanutara tarangakriti Shive
Krishe madhye kinchij janani tava yad bhati sudhiyam.
Vimardad anyonyam kucha kalashayor antaragatam
Tanubhutam vyoma pravishad iva nabhim kuharinim.

78 स्थिरो गङ्गावर्तः स्तनमुकुलरोमावलिलता-
कलावालं कुण्डं कुसुमशरतेजोहुतभुजः।
रतेर्लीलागारं किमपि तव नाभिर्गिरिसुते
बिलद्वारं सिद्धेर्गिरिशनयनानां विजयते॥

Sthiro Gangavartah stana mukula romavali lata-
Kalavalam kundam kusuma shara tejo hutabhujah.
Rater lilagaram kim api tava nabhir giri sute
Bila dvaram siddher Girisha nayananam vijayate.

79 निसर्गक्षीणस्य स्तनतटभरेण क्लमजुषो
नमन्मूर्तेर्नारीतिलक शनकैस्त्रुट्यत इव।
चिरं ते मध्यस्य त्रुटिततटिनीतीरतरुणा
समावस्थास्थेम्नो भवतु कुशलं शैलतनये॥

Nisarga kshinasya stana tata bharena klama jusho
Naman murter nari tilaka shanakais trutyata iva.
Chiram te madhyasya trutita tatini tira taruna
Samavastha sthemno bhavatu kushalam shaila tanaye.

80 कुचौ सद्यःस्विद्यत्तटघटितकूर्पासभिदुरौ
कषन्तौ दोर्मूले कनककलशाभौ कलयता।
तव त्रातुं भङ्गादलमिति वलग्नं तनुभुवा
त्रिधा नद्धं देवि त्रिवलि लवलीवल्लिभिरिव॥

Kuchau sadyah svidyat tata ghatita kurpasa bhidurau
Kashantau dormule kanaka kalashabhau kalayata.
Tava tratum bhangad alam iti valagnam tanubhuva
Tridha naddham devi trivali lavali vallibhir iva.

81 गुरुत्वं विस्तारं क्षितिधरपतिः पार्वति निजा-
न्नितम्बादाच्छिद्य त्वयि हरणरूपेण निदधे।
अतस्ते विस्तीर्णो गुरुरयमशेषां वसुमतीं
नितम्बप्राग्भारः स्थगयति लघुत्वं नयति च॥

Gurutvam vistaram kshitidhara patih Parvati nija-
Nnitambad achchhidya tvayi harana rupena nidadhe.
Atas te vistirno gurur ayam ashesham vasumatim
Nitamba pragbharah sthagayati laghutvam nayati cha.

82 करीन्द्राणां शुण्डान्कनककदलीकाण्डपटली-
मुभाभ्यामूरुभ्यामुभयमपि निर्जित्य भवति।
सुवृत्ताभ्यां पत्युः प्रणतिकठिनाभ्यां गिरिसुते
विधिज्ञे जानुभ्यां विबुधकरिकुम्भद्वयमसि॥

Karindranam shundan kanaka kadali kanda patali-
Mubhabhyam urubhyam ubhayam api nirjitya bhavati.
Suvrittabhyam patyuh pranati kathinabhyam giri sute
Vidhijne janubhyam vibudha kari kumbha dvayam asi.

83 पराजेतुं रुद्रं द्विगुणशरगर्भौ गिरिसुते
निषङ्गौ जङ्घे ते विषमविशिखो बाढमकृत।
यदग्रे दृश्यन्ते दशशरफलाः पादयुगली-
नखाग्रच्छद्मानः सुरमुकुटशाणैकनिशिताः॥

Parajetum Rudram dviguna shara garbhau giri sute
Nishangau janghe te vishama vishikho badham akrita.
Yad agre drishyante dasha shara phalah pada yugali-
Nakhagrach chhadmanah sura mukuta shanaika nishitah.

84 श्रुतीनां मूर्धानो दधति तव यौ शेखरतया
ममाप्येतौ मातः शिरसि दयया धेहि चरणौ।
ययोः पाद्यं पाथः पशुपतिजटाजूटतटिनी
ययोर्लाक्षालक्ष्मीररुणहरिचूडामणिरुचिः॥

Shrutinam murdhano dadhati tava yau shekharataya
Mamapy etau matah shirasi dayaya dhehi charanau.
Yayoh padyam pathah Pashupati jata juta tatini
Yayor laksha lakshmir aruna Hari chudamani ruchih.

85 नमोवाकं ब्रूमो नयनरमणीयाय पदयो-
स्तवास्मै द्वन्द्वाय स्फुटरुचिरसालक्तकवते।
असूयत्यत्यन्तं यदभिहननाय स्पृहयते
पशूनामीशानः प्रमदवनकङ्केलितरवे॥

Namovakam brumo nayana ramaniyaya padayo-
Stavasmai dvandvaya sphuta ruchi rasalaktakavate.
Asuyaty atyantam yad abhihananaya sprihayate
Pashunam Ishanah pramada vana kankeli tarave.

86 मृषा कृत्वा गोत्रस्खलनमथ वैलक्ष्यनमितं
ललाटे भर्तारं चरणकमले ताडयति ते।
चिरादन्तःशल्यं दहनकृतमुन्मूलितवता
तुलाकोटिक्वाणैः किलिकिलितमीशानरिपुणा॥

Mrisha kritva gotra skhalanam atha vailakshya namitam
Lalate bhartaram charana kamale tadayati te.
Chirad antah shalyam dahana kritam unmulitavata
Tula koti kvanaih kilikilitam Ishana ripuna.

87 हिमानीहन्तव्यं हिमगिरिनिवासैकचतुरौ
निशायां निद्राणां निशि चरमभागे च विशदौ।
वरं लक्ष्मीपात्रं श्रियमतिसृजन्तौ समयिनां
सरोजं त्वत्पादौ जननि जयतश्चित्रमिह किम्॥

Himani hantavyam himagiri nivasaika chaturau
Nishayam nidranam nishi charama bhage cha vishadau.
Varam lakshmi patram shriyam atisrijantau samayinam
Sarojam tvat padau janani jayatash chitram iha kim.

88 पदं ते कीर्तीनां प्रपदमपदं देवि विपदां
कथं नीतं सद्भिः कठिनकमठीकर्परतुलाम्।
कथं वा बाहुभ्यामुपयमनकाले पुरभिदा
यदादाय न्यस्तं दृषदि दयमानेन मनसा॥

Padam te kirtinam prapadam apadam devi vipadam
Katham nitam sadbhih kathina kamathi karpara tulam.
Katham va bahubhyam upayamana kale Purabhida
Yad adaya nyastam drishadi dayamanena manasa.

89 नखैर्नाकस्त्रीणां करकमलसंकोचशशिभि-
स्तरूणां दिव्यानां हसत इव ते चण्डि चरणौ।
फलानि स्वःस्थेभ्यः किसलयकराग्रेण ददतां
दरिद्रेभ्यो भद्रां श्रियमनिशमह्नाय ददतौ॥

Nakhair nakastrinam kara kamala sankocha shashibhi-
Starunam divyanam hasata iva te chandi charanau.
Phalani svahsthebhyah kisalaya karagrena dadatam
Daridrebhyo bhadram shriyam anisham ahnaya dadatau.

90 ददाने दीनेभ्यः श्रियमनिशमाशानुसदृशी-
ममन्दं सौन्दर्यप्रकरमकरन्दं विकिरति।
तवास्मिन्मन्दारस्तबकसुभगे यातु चरणे
निमज्जन्मज्जीवः करणचरणः षट्चरणताम्॥

Dadane dinebhyah shriyam anisham ashanusadrishi-
Mamandam saundarya prakara makarandam vikirati.
Tavasmin mandara stabaka subhage yatu charane
Nimajjan majjivah karana charanah shatcharanatam.

91 पदन्यासक्रीडापरिचयमिवारब्धुमनसः
स्खलन्तस्ते खेलं भवनकलहंसा न जहति।
अतस्तेषां शिक्षां सुभगमणिमञ्जीररणित-
च्छलादाचक्षाणं चरणकमलं चारुचरिते॥

Pada nyasa krida parichayam ivarabdhu manasah
Skhalantas te khelam bhavana kala hansa na jahati.
Atas tesham shiksham subhaga mani manjira ranita-
Chchhalad achakshanam charana kamalam charu charite.

92 गतास्ते मञ्चत्वं द्रुहिणहरिरुद्रेश्वरभृतः
शिवः स्वच्छच्छायाघटितकपटप्रच्छदपटः।
त्वदीयानां भासां प्रतिफलनरागारुणतया
शरीरी शृङ्गारो रस इव दृशां दोग्धि कुतुकम्॥

Gatas te manchatvam Druhina Hari Rudreshvara bhritah
Shivah svachchha chchhaya ghatita kapata prachchhadapatah.
Tvadiyanam bhasam pratiphalana ragarunataya
Shariri shringaro rasa iva drisham dogdhi kutukam.

93 अराला केशेषु प्रकृतिसरला मन्दहसिते
शिरीषाभा चित्ते दृषदुपलशोभा कुचतटे।
भृशं तन्वी मध्ये पृथुरुरसिजारोहविषये
जगत्त्रातुं शंभोर्जयति करुणा काचिदरुणा॥

Arala kesheshu prakriti sarala manda hasite
Shirishabha chitte drishad upala shobha kucha tate.
Bhrisham tanvi madhye prithur urasijaroha vishaye
Jagat tratum Shambhor jayati karuna kachid aruna.

94 कलङ्कः कस्तूरी रजनिकरबिम्बं जलमयं
कलाभिः कर्पूरैर्मरकतकरण्डं निबिडितम्।
अतस्त्वद्भोगेन प्रतिदिनमिदं रिक्तकुहरं
विधिर्भूयो भूयो निबिडयति नूनं तव कृते॥

Kalankah kasturi rajanikara bimbam jalamayam
Kalabhih karpurair marakata karandam nibiditam.
Atas tvad bhogena pratidinam idam rikta kuharam
Vidhir bhuyo bhuyo nibidayati nunam tava krite.

95 पुरारातेरन्तःपुरमसि ततस्त्वच्चरणयोः
सपर्यामर्यादा तरलकरणानामसुलभा।
तथा ह्येते नीताः शतमखमुखाः सिद्धिमतुलां
तव द्वारोपान्तस्थितिभिरणिमाद्याभिरमराः॥

Purarater antahpuram asi tatas tvach charanayoh
Saparya maryada tarala karananam asulabha.
Tatha hy ete nitah shatamakha mukhah siddhim atulam
Tava dvaropanta sthitibhir animadyabhir amarah.

96 कलत्रं वैधात्रं कतिकति भजन्ते न कवयः
श्रियो देव्याः को वा न भवति पतिः कैरपि धनैः।
महादेवं हित्वा तव सति सतीनामचरमे
कुचाभ्यामासङ्गः कुरवकतरोरप्यसुलभः॥

Kalatram vaidhatram kati kati bhajante na kavayah
Shriyo devyah ko va na bhavati patih kair api dhanaih.
Mahadevam hitva tava sati satinam acharame
Kuchabhyam asangah kuravaka taror apy asulabhah.

97 गिरामाहुर्देवीं द्रुहिणगृहिणीमागमविदो
हरेः पत्नीं पद्मां हरसहचरीमद्रितनयाम्।
तुरीया कापि त्वं दुरधिगमनिःसीममहिमा
महामाया विश्वं भ्रमयति परब्रह्ममहिषि॥

Giram ahur devim Druhina grihinim agamavido
Hareh patnim padmam Hara sahacharim adri tanayam.
Turiya kapi tvam duradhigama nihsima mahima
Mahamaya vishvam bhramayati parabrahma mahishi.

98 कदा काले मातः कथय कलितालक्तकरसं
पिबेयं विद्यार्थी तव चरणनिर्णेजनजलम्।
प्रकृत्या मूकानामपि च कविताकारणतया
कदा धत्ते वाणीमुखकमलताम्बूलरसताम्॥

Kada kale matah kathaya kalitalaktaka rasam
Pibeyam vidyarthi tava charana nirnejana jalam.
Prakritya mukanam api cha kavita karanataya
Kada dhatte vani mukha kamala tambula rasatam.

99 सरस्वत्या लक्ष्म्या विधिहरिसपत्नो विहरते
रतेः पातिव्रत्यं शिथिलयति रम्येण वपुषा।
चिरं जीवन्नेव क्षपितपशुपाशव्यतिकरः
परानन्दाभिख्यं रसयति रसं त्वद्भजनवान्॥

Sarasvatya lakshmya Vidhi Hari sapatno viharate
Rateh pativratyam shithilayati ramyena vapusha.
Chiram jivann eva kshapita pashu pasha vyatikarah
Paranandabhikhyam rasayati rasam tvad bhajanavan.

100 प्रदीपज्वालाभिर्दिवसकरनीराजनविधिः
सुधासूतेश्चन्द्रोपलजललवैरर्घ्यरचना।
स्वकीयैरम्भोभिः सलिलनिधिसौहित्यकरणं
त्वदीयाभिर्वाग्भिस्तव जननि वाचां स्तुतिरियम्॥

Pradipa jvalabhir divasakara nirajana vidhih
Sudhasutesh chandropala jala lavair arghya rachana.
Svakiyair ambhobhih salila nidhi sauhitya karanam
Tvadiyabhir vagbhis tava janani vacham stutir iyam.

Text checked against: Saundaryalahari, Sri Vani Vilas Press (Sri Vani Vilas Mudrayantralaya), Srirangam 1916 (bound with Shivanandalahari). Meanings, audio and all scripts at nityapaath.com/soundarya-lahari/